This Question Paper consists 35 questions and 7 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 7 मुद्रितपुटानि च सन्ति ।

Sl. No.

Roll No. | | | | | | | | | | | | |
अनुक्रमाङ्क

Code No. 60/SS/A
गुढसंख्या

Set /स्तबकः **A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (347)

Day and Date of Examination
(परीक्षादिनं दिनाङ्कश्च) ____________________

Signature of Invigilators
(निरीक्षकयोः हस्ताक्षरम्)
1. ____________________
2. ____________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्कः : प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या 60/SS/A - A नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# BHARATIYA DARSHAN

# भारतीयदर्शनम्

# (347)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः : (Full Marks) : 100

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5,** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (प्रश्नाः × अङ्काः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) समे प्रश्नाः अनिवार्याः ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **[10 × 1 = 10]**

**1.** के बहुपुरुषवादम् अङ्गीकुर्वन्ति ?

(क) नैयायिकाः

(ख) वैशेषिकाः

(ग) वेदान्तिनः

(घ) सांख्याः

**2.** एकादशको गणः कस्मात् तत्त्वात् उत्पद्यते ?

(क) प्रकृतेः

(ख) महत्तत्त्वात्

(ग) तमःप्रधानाद् अहङ्कारात्

(घ) सत्त्वप्रधानात् अहङ्कारात्

3. वेदान्तमते प्रमा कति ?

(क) पञ्च

(ख) षट्

(ग) अष्ट

(घ) चतस्रः

4. वेदान्तमते अभावः कतिविधः ?

(क) त्रिविधः

(ख) चतुर्विधः

(ग) द्विविधः

(घ) षड्विधः

5. वेदान्तमते सिद्धान्तपक्षे लक्षणायाः बीजं किम् ?

(क) अन्वयानुपपत्तिः

(ख) तात्पर्यानुपपत्तिः

(ग) अर्थानुपपत्तिः

(घ) शब्दानुपपत्तिः

6. उपपाद्यज्ञानेन उपपादककल्पनम् इति कस्य प्रमाणस्य लक्षणम् ?

(क) अनुपलब्धेः

(ख) अर्थापत्तेः

(ग) उपमानस्य

(घ) पुराणस्य

7. कस्यामुपनिषदि आकाशप्रमुखा सृष्टिः प्रतिपाद्यते ?

(क) तैत्तिरीयोपनिषदि

(ख) कठोपनिषदि

(ग) बृहदारण्यकोपनिषदि

(घ) छान्दोग्योपनिषदि

8. कर्मेन्द्रियाणि कस्मात् उत्पद्यन्ते ?

(क) सूक्ष्मभूतानां सात्त्विकांशेभ्यः

(ख) सूक्ष्मभूतानां रजोंऽशेभ्यः

(ग) सूक्ष्मभूतानां तमोंऽशेभ्यः

(घ) सूक्ष्मभूतानां सर्वांशेभ्यः

9. विषयेभ्यो बाह्येन्द्रियाणां निग्रहः किमुच्यते।

(क) शमः

(ख) दमः

(ग) उपरतिः

(घ) वैराग्यम्

10. जीवात्मनः कति अवस्थाः भवन्ति ?

(क) द्वे

(ख) तिस्रः

(ग) चतस्रः

(घ) पञ्च

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। [10 × 2 = 20]

11. का केवलप्रकृतिः? किमर्थं सा केवलप्रकृतिः इति उच्यते? [1 + 1]

12. अतिदूरात् वस्तु न दृश्यते इत्यस्य दृष्टान्तः कः? अतिसामीप्यात् च वस्तु न दृश्यते इत्यस्य दृष्टान्तः कः [1 + 1]

13. शाब्दबोधे का नाम वृत्तिः? सा कतिधा? [1 + 1]

14. करणस्य लक्षणं किम्? वृत्त्यात्मकं ज्ञानं कस्य धर्मः? [1 + 1]

15. ईश्वरः कः? ईश्वरसाक्षी च कः? [1 + 1]

16. शुक्तिरजतस्य परिणाम्युपादानकारणं किम्? विवर्तोपादानकारणं च किम्? [1 + 1]

17. अद्वैतवेदान्तमते आरोपितस्य वस्तुनः किं स्वरूपम्? ख्यादिपदस्य कोऽर्थः? [1 + 1]

18. प्रातिभासिकत्वे नियामकं किं भवति? शुक्तिरजतोत्पत्तौ इन्द्रियदोषः कः? [1 + 1]

19. ध्यानं नाम किम्? ध्यानविषये पातञ्जलं सूत्रं किम्? [1 + 1]

20. समाधेः अन्तरायाः के? प्रत्याहारः नाम किम्? [1 + 1]

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त। **[10 × 4 = 40]**

21. तत्त्वमसि इति महावाक्यात् कथं निर्विकल्पकं ज्ञानं भवति इति पर्यालोचयत।

22. वेदान्तमते शाब्दबोधे सहकारिकारणानां संक्षेपेण परिचयः दीयताम्।

23. ज्ञानगतस्य प्रत्यक्षस्य प्रयोजकं किमिति विषये लघुटिप्पणीं लिखत।

24. अद्वैतवेदान्तमते ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च कस्मात् उत्पद्यन्ते इति समासेन वर्णयत।

25. मायायाः एकत्वम् आहोस्वित् नानात्वमिति विचारयत।

26. अध्यासप्रयोजनं समासेन वर्णयत।

27. परिणामवादं विवर्तवादं च समासेन वर्णयत।

28. सुषुप्त्यवस्थाविषये लघुटिप्पणीम् एकां लिखत।

29. काम्यं निषिद्धं नित्यं नैमित्तिकं च कर्म समासेन वर्ण्यताम्।

30. अद्वैतवेदान्तानुसारेण विदेहमुक्तिं समासेन वर्णयत।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः। **[5 × 6 = 30]**

**31.** सांख्यदर्शनानुसारेण सत्कार्यवादस्वीकाराय यथेच्छं कारणद्वयं विस्तरेण विचार्यताम्।

**32.** वेदान्तमते पञ्चीकरणम् वैशद्येन प्रतिपाद्यताम्।

**33.** ब्रह्मणः स्वरूपलक्षणं संक्षेपेण आलोचयत।

**34.** षड्विधानां तात्पर्यनिर्णायकलिङ्गानां सोदाहरणं परिचयः प्रदीयताम्।

**35.** विवेकानन्दस्य समन्वयभावं संक्षेपेण वर्णयत।

♦ ♦ ♦